# द्रुतवाचनम्

## 2. हास्यकणिका:

[मानव जीवन में हास-परिहास की महत्त्वपूर्ण भूमिका होती है । इससे जीवन में उत्साह तथा नयी ऊर्जा का संचार होता है । जो लोग इससे दूर रहते हैं वे तनाव में जीते हैं । इसलिए हास्य को एक रस माना गया है क्योंकि यह आनन्द प्रदान करता है । हास्य से सम्बद्ध रचनाएँ बड़ी और छोटी दोनों प्रकार की होती हैं । छोटी रचनाओं को हास्यकणिका के रूप में प्रतिपादित किया जाता है । इन्हें हिन्दी में चुटकुला कहा जाता है । अपने लघु आकार में होने पर भी ये मुस्कुराहट उत्पन्न करके जीवन के तनाव को शिथिल करते हैं । यहाँ ऐसे ही कुछ प्रसंग दिये गये हैं ।]



### 1. मानचित्रे न नदी

अध्यापकः - मोहन ! गंगानदी कुत्र विद्यते ?

मोहनः - आचार्य ! भूमौ अस्ति ।

अध्यापकः - हसित्वा वदति 'मानचित्रे कुत्र अस्ति इति वदतु ।'

मोहनः - श्रीमन् ! मानचित्रे कथं भवितुम् अर्हति सा नदी ?
यदि तत्र स्यात् तर्हि मानचित्रम् आर्द्रं भवेत् खलु ?

## 2. तदर्थं चेत्

भार्या - कुत्र गच्छति भवान् ?

पतिः - आत्मदाहं कर्तुं गच्छामि । किमर्थम् ?

भार्या - अस्तु, तर्हि पुरातनं वस्त्रं धृत्वा गच्छतु, यतो हि नूतनं दग्धं भविष्यति चेत् वृथा हानिः ।

## 3. ज्योतिषिणः उपदेशः

पुरुषः - (ज्योतिषिणः समीपे आगत्य) मम हस्ते कण्डूतिः भवति ।

ज्योतिषी - तदा धनम् आगमिष्यति ।

पुरुषः - मम कर्णे अपि कण्डूतिः ।

ज्योतिषी - कर्णाभरणम् अपि प्राप्स्यसि ।

पुरुषः - मम कण्ठे अपि .........

ज्योतिषी (कोपेन)- धावित्वा वैद्यं प्रति गच्छ । त्वं चर्मरोगेण ग्रस्तः ।

## 4. अहम् एव आनयामि

(आरक्षकः चौरं मार्गे नयन् अस्ति)

चौरः - स्वामिन् ! कृपया माम् एकं क्षणं मोचयतु ।

आरक्षक: - किं कार्यम् ? किमर्थं विमोचनम् ?

चौर: - शिरोवेदनया पीडित: अस्मि । महती पीडा वर्तते । एकां पीडानाशिनीं गोलिकां क्रीत्वा शीघ्रम् आगच्छामि ।

आरक्षक: - भो:, किम् अहं भवत: चातुर्यं न जानामि ? अहं भवन्तं त्यजामि चेत् भवान् तथैव पलायनं कुर्यात् । पुन: न आगच्छेत् एव । मां वञ्चयितुं भवान् न शक्नोति । भवान् अत्रैव तिष्ठतु । अहमेव गत्वा भवते गोलिकाम् आनयामि ।

## 5. यथा लिखितं तथैव कृतम्

वैद्य: - इदानीं कथम् अस्ति भवत: आरोग्यम् ?

रोगी - सम्यक् जातम् ।

वैद्य: - मया उक्तं सर्वम् औषधं भवता स्वीकृतं खलु !

रोगी - नैव खलु । कूप्यां यथा लिखितम् अस्ति तथा कृतम् ।

वैद्य: - कूप्यां किं लिखितम् आसीत् ।

रोगी - कूपीम् आवरणेन सम्यक् पिधाय शीतके स्थापनीयम् इति लिखितम् आसीत् तत्र । अहं तथैव कृतवान् ।

**शब्दार्था: -**

अध्यापक: = शिक्षक

कुत्र = कहाँ

| | | |
|---|---|---|
| भूमौ | = | धरती पर |
| हसित्वा | = | हँसकर |
| वदति | = | बोलता है |
| मानचित्रे | = | मानचित्र में, पर |
| वदतु | = | बोलिए |
| श्रीमान् | = | महाशय, महोदय |
| कथम् | = | कैसे |
| स्यात् | = | होगा, हो |
| आर्द्रम् | = | गीला |
| भवेत् | = | हो जाएगा |
| खलु | = | निश्चित ही |
| तदर्थम् | = | उसके लिए |
| चेत् | = | यदि |
| किमर्थम् | = | किसलिए, क्यों |
| पुरातनम् | = | पुराना |
| वस्त्रं धृत्वा | = | वस्त्र धारण करके |
| गच्छतु | = | जाइए |

| | | |
|---|---|---|
| यतः | = | क्योंकि |
| नूतनम् | = | नया |
| दग्धं भविष्यति | = | जल जाएगा |
| वृथा | = | व्यर्थ |
| ज्योतिषिणः | = | ज्योतिषी के |
| हस्ते | = | हाथ में |
| कण्डूतिः | = | खुजलाहट |
| कर्णे | = | कान में |
| कर्णाभरणम् | = | कान का आभूषण |
| प्राप्स्यसि | = | प्राप्त करोगे |
| कण्ठे | = | गले में |
| कोपेन | = | क्रोध से |
| धावित्वा | = | दौड़कर |
| वैद्यं प्रति | = | वैद्य के पास |
| चर्मरोगेण | = | त्वचा की बीमारी से |
| आनयामि | = | लाता हूँ |
| आरक्षकः | = | सिपाही |

| | | |
|---|---|---|
| नयन् | = | ले जाता हुआ |
| स्वामिन् | = | हे मालिक |
| माम् | = | मुझको |
| एकं क्षणम् | = | एक पल |
| मोचयतु | = | छोड़ दीजिए |
| किमर्थम् विमोचनम् | = | किसलिए छोड़ना |
| शिरोवेदनया | = | सिर दर्द से |
| महती पीडा | = | बहुत ज्यादा दर्द |
| एकाम् | = | एक (को) |
| पीडानाशिनीम् | = | दर्द नाशक (को) |
| गोलिकाम् | = | गोली (tablet) |
| चातुर्यम् | = | चालाकी |
| जानामि | = | जानता हूँ |
| भवन्तम् | = | आपको |
| त्यजामि | = | छोड़ता हूँ |
| तथैव | = | वैसे ही |
| पलायनम् | = | भाग जाना |

| | | |
|---|---|---|
| कुर्यात् | = | किया जाना चाहिए |
| आगच्छेत् | = | आ जाना चाहिए |
| वञ्चयितुम् | = | ठगने के लिए |
| भवान् | = | आप |
| शक्नोति | = | सकता है |
| अत्रैव | = | यहीं |
| तिष्ठतु | = | ठहरिए |
| अहमेव | = | मैं ही |
| गत्वा | = | जाकर |
| भवते | = | आपके लिए |
| आनयामि | = | लाता हूँ |
| लिखितम् | = | लिखा हुआ |
| कृतम् | = | किया गया |
| इदानीम् | = | इस समय |
| भवतः | = | आपका |
| आरोग्यम् | = | स्वास्थ्य |
| सम्यक् | = | ठीक |

| | | |
|---|---|---|
| जातम् | = | हो गया है |
| उक्तम् | = | कहा गया |
| सर्वम् | = | सभी |
| औषधम् | = | औषध, दवा |
| स्वीकृतम् | = | ग्रहण/स्वीकार/किया गया |
| कूप्याम् | = | शीशी पर |
| आवरणेन | = | ढक्कन से |
| पिधाय | = | बन्द करके |
| शीतके | = | ठण्डा करने वाले यन्त्र (फ्रीज) में |
| स्थापनीयम् | = | रखना चाहिए |

## व्याकरणम्

### सन्धि-विच्छेदः/पदविच्छेदः -

| | | |
|---|---|---|
| कर्णाभरणम् | = | कर्ण + आभरणम् (दीर्घसन्धिः) |
| तथैव | = | तथा + एव (वृद्धिसन्धिः) |
| अत्रैव | = | अत्र + एव (वृद्धिसन्धिः) |
| नैव | = | न + एव (वृद्धिसन्धिः) |

**प्रकृति-प्रत्यय-विभागः -**

| | | |
|---|---|---|
| धृत्वा | = | √धृ + क्त्वा |
| आगत्य | = | आ + √गम् + ल्यप् |
| आगमिष्यति | = | आ + √गम् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| प्राप्स्यसि | = | प्र + √आप् , लट्लकारः, मध्यमपुरुषः, एकवचनम् |
| धावित्वा | = | √धाव् + क्त्वा |
| ग्रस्तः | = | ग्रस् + क्त, पुं॰, एकवचनम् |
| आनयामि | = | आ + √नी , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| नयन् | = | √नी + शतृ, पुं॰, एकवचनम् |
| मोचयतु | = | √मुच् + णिच् + लोट्लकारः, प्रथमपुरुषः, एकवचनम् |
| क्रीत्वा | = | √क्री + क्त्वा |
| जानामि | = | √ज्ञा , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| त्यजामि | = | √त्यज् , लट्लकारः, उत्तमपुरुषः, एकवचनम् |
| कुर्यात् | = | √कृ , विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| तिष्ठतु | = | √स्था , लोट्लकारः, प्रथमपुरुषः, एकवचनम् |
| लिखितम् | = | √लिख् + क्त, नपुं॰, एकवचनम् |

| | | |
|---|---|---|
| कृतम् | = | $\sqrt{\text{कृ}}$ + क्त, नपुं०, एकवचनम् |
| जातम् | = | $\sqrt{\text{जन्}}$ +क्त, नपुं०, एकवचनम् |
| आसीत् | = | $\sqrt{\text{अस्}}$ , लङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| स्थापनीयम् | = | $\sqrt{\text{स्था}}$ + णिच् + अनीयर्, नपुं०, एकवचनम् |
| कृतवान् | = | $\sqrt{\text{कृ}}$ +क्तवतु, पुं०, एकवचनम् |

# अभ्यासः

## मौखिकः

**अधोलिखितानां पदानाम् उच्चारणं कुरुत -**

अध्यापकः, गंगानदी, आर्द्रम्, किमर्थम्, ज्योतिषिणः, आगत्य, कर्णाभरणम्, चर्मरोगेण, कण्डूतिः, मोचयतु, शिरोवेदनया, पीडानाशिनीम् ।

**अधोलिखितानां पदानाम् अर्थं वदत -**

श्रीमान्, वदति, भूमौ, कथम्, आरक्षकः, स्वामिन्, जानामि , गत्वा, भवान्, त्यजामि, भार्या, नूतनम् ।

**अपने स्मरण से कोई चुटकुला सुनाइए ।**

## लिखितः

**संस्कृतभाषायां वाक्यनिर्माणं कुरुत -**

गत्वा, जानामि, कृतवान्, आसीत्, अस्ति, गच्छामि ।

2. अधोलिखितानां पदानां सन्धि-विच्छेदं कुरुत -

(क) कर्णाभरणम् = ..........................

(ख) अत्रैव = ..........................

(ग) नैव = ..........................

(घ) इत्यादि = ..........................

(ङ) तथैव = ..........................

(च) यद्यपि = ..........................

3. सुमेलनं कुरुत -

| | |
|---|---|
| (क) धृत्वा | (अ) √क्री + क्त्वा |
| (ख) क्रीत्वा | (आ) √कृ + क्तवतु |
| (ग) धावित्वा | (इ) √धृ + क्त्वा |
| (घ) कृतवान् | (ई) √धाव् + क्त्वा |
| (ङ) दत्त्वा | (उ) √ग्रस् + क्त |
| (च) ग्रस्तः | (ऊ) √दा + क्त्वा |

4. निम्नलिखितानां पदानां बहुवचनरूपं लिखत -

आगमिष्यति = ..........................

आनयामि = ..........................

जानामि = ..........................

त्यजामि = ..........................

आसीत् = ..........................

अस्ति = ..........................

भवति = ..........................

वदामि = ..........................

गच्छामि = ..........................

5. **कोष्ठात् चित्वा उचितपदेन रिक्तस्थानानि पूरयत -**

[आत्मदाहम्, समीपे, कण्डूतिः, पीडितः, कृतवान्, गोलिकाम्]

(क) ज्योतिषिणः ........................ आगत्य ।

(ख) मम कर्णे अपि ...................... ।

(ग) ...................... कर्तुं गच्छामि ।

(घ) शिरोवेदनया ..................... अस्मि ।

(ङ) अहमेव गत्वा भवते ................. आनयामि ।

(च) अहं तथैव ........................ ।

6. **उदाहरणानुसारं अव्ययपदानि चिनुत -**

यथा - कुत्र गच्छति भवान् ? ...कुत्र...

(क) मानचित्रे कथं भवितुम् अर्हति सा नदी ? ...............

(ख) तदा धनम् आगमिष्यति । ......................

(ग) मम कर्णे अपि कण्डूतिः । ....................

(घ) अहं तथैव कृतवान् । ..........................

(ङ) कर्णाभरणम् अपि प्राप्स्यसि । ....................

7. **अधोलिखितानि अशुद्धानि पदानि शुद्धानि कृत्वा लिखत -**

(क) हसीत्वा = ............................

(ख) मानचीत्रम् = ............................

(ग) गङ्गानदि = ............................

(घ) स्वामीन् = ............................

(ङ) अरोग्यम् = ............................

(च) सम्यक = ............................

(छ) शक्नोती = ............................

(ज) कूपिम् = ............................

♦ ♦ ♦